# 8. सूर्याय नमः



राधिका – प्रिये शोभने!

अस्य पाठस्य चित्रं पश्य।

शोभना – पश्यामि राधिके! पश्यामि।

राधिका – भवतु। चित्रे किं पश्यसि?

शोभना – सूर्योदयं पश्यामि।

विभा – शोभने! सूर्यः कदा उदयते?

शोभना – प्रभातसमये विभे!

विभा – समीचीनम्।

प्रभा – शोभने, घटिकां दृष्ट्वा कथय। अधुना समयः कः?

शोभना – अधुना प्रातः षड्वादनम्।

राधिका – समीचीनम्। माले! अधुना सूर्यस्य उदयः भवति किल?

माला – आम् राधिके।

सूर्योदय – सूर्योदये जनाः किं किं कुर्वन्ति?

राधिका – चित्रं दृष्ट्वा कथय।

माला – कथयामि। जनाः शयनात् उत्तिष्ठन्ति।

देवी – ततः दन्तधावनं कुर्वन्ति। केचन दन्तधावनं कृत्वा स्नानं कुर्वन्ति।

भामिनी – ते देवं नमन्ति। छात्राः स्वपाठान् पठन्ति।
ते पाठं लिखन्ति।

मालिनी – पिता समाचारपत्रं पठति।

कामिनी – छात्राः विद्यालयं गच्छन्ति। पिता कार्यालयं गच्छति।

भार्गवी – कृषकः क्षेत्रं कर्षति।

नन्दिनी – माता ओदनं पचति। एवं सर्वे स्वं-स्वं कार्यं कुर्वन्ति।

राधिका – पश्यत! आचार्यः आगतः। तूष्णीं भवत।
(आचार्यः कक्षां प्रविशति)

आचार्यः – प्रिय-छात्राः! अद्य वयं सौरशक्तेः उपयोगविषये किञ्चित् पठामः।

छात्राः – आचार्य! वयं पठितुम् इच्छामः ।

आचार्यः – भवतु। नमन! उत्तिष्ठ। कथय, सूर्यः कुत्र उदयते?

नमनः – आचार्य! सूर्यः पूर्वस्यां दिशि उदयते।

आचार्यः – शोभनम्। सः कुत्र अस्तं गच्छति?

नमनः – श्रीमन्। सूर्यः पश्चिमायां दिशि अस्तं गच्छति।

आचार्यः – शोभनमेव। उपविश। वरुण! उत्तिष्ठ। सूर्यस्य किरणाः कीदृशाः भवन्ति?

वरुणः – आचार्य! सूर्यकिरणाः अति प्रकाशयुक्ताः भवन्ति।

आचार्यः – समीचीनम्। छात्राः ! सूर्यः तेजोमयः अस्ति। तस्य तेजः संहरणीयम्।

प्रभुः – तेन किं प्रयोजनं सिध्यति?

आचार्यः – समीचीनः प्रश्नः । सूर्यस्य ऊर्जा विविधरूपेण उपयुक्ता भवति।

प्रभुः – गुरुदेव। सौरशक्तेः विविधान् उपयोगान् कथयतु।

आचार्यः – शोभनम्। सौरशक्त्या सौरशाकपाकस्थाली (सोलर-कुक्कर), सौरजलदाहकः (सोलर-वाटर-हीटर), जलउत्तोलकम् (सोलर- वाटर-पम्प), वाहनगति-नियन्त्रकम् इत्यादीनां साधनानाम् उपयोगः अनिवार्यः । विद्युत्-शक्तेः लवणस्य च उत्पत्तिः सौरशक्त्या भवति। एवं सौरशक्तेः अनेके उपयोगाः भवन्ति।

छात्राः – धन्याः वयं गुरुवर्य!

# अनुशीलनम्

1. **सूर्यशक्तेः उपयोगः कथं क्रियते? मेलनं कृत्वा लिखत।**

| साधनानि | उपयोगाः |
|---|---|
| सोलर–कुक्कर | उष्णोदक–उत्तोलनम् |
| सोलर–वाटर–हीटर | यातायात–नियन्त्रणम् |
| | भक्ष्याणां परिपाकः |

उत्तराणि चित्वा (वाक्यरूपेण) पुनः लिखत।

(i)

(ii)

(iii)

2. **पठित्वा 'आम्' अथवा 'न' इति लिखत।**

(i) किं सौरशक्त्या लवणस्य उत्पत्तिः भवति? -----------

(ii) किं सौरशक्त्या विद्युत्–शक्तेः उत्पत्तिः अपि भवति? -----------

(iii) किं सौरविद्युत्–शक्त्या अनेकानि साधनानि सञ्चालितानि भवन्ति -----------

(iv) किं सौरशक्त्या उष्णोदकस्य उत्तोलनं सुकरं भवति?

------------

(v) किं सौरशक्तिसाधनानाम् उपयोगेन वातावरणं सुरक्षितं भवति।

------------

**3. उचितम् उत्तरं चित्वा लिखत।**

(i) सूर्यः ------------ (प्रातः/सायं) उदयते।

(ii) सूर्यः ------------ (पश्चिमायां/पूर्वस्यां) दिशि उदयते।

(iii) सूर्यः प्रातः ------------ (पञ्च/षड्) वादने उदयते।

(iv) सूर्योदये जनाः स्व-स्व-कर्माणि ------------ (कुर्वन्ति/न कुर्वन्ति)।

**4. पाठात् चित्वा रिक्तस्थानानि पूरयत।**

(i) सूर्यकिरणाः ------------ भवन्ति।

(ii) सूर्यः ------------ भवति।

(iii) सूर्यः तेजः ------------।

(iv) सूर्यस्य ऊर्जा अतीव ------------ भवति।

**5. कः किं करोति? मेलनं कृत्वा लिखत।**

| | |
|---|---|
| माता | देवं नमति |
| पिता | क्षेत्रं कर्षति |
| गुरुः | गानं गायति |
| कृषकः | समाचार-पत्रं पठति |
| बालिका | पाठं पाठयति |

भक्तः ओदनं पचति

(i) ------------------------------------------

(ii) ------------------------------------------

(iii) ------------------------------------------

(iv) ------------------------------------------

(v) ------------------------------------------

(vi) ------------------------------------------

## 6. एकेन पदेन उत्तरयत।

(i) सूर्यः कदा उदयते? ------------

(ii) सूर्यः कदा अस्तं गच्छति? ------------

(iii) कृषकः किं करोति? ------------।

(iv) छात्राः कुत्र गच्छन्ति? ------------।

(v) का गायति? ------------।

(vi) कः समाचार-पत्रं पठति? ------------।

## 7. चित्राणि दृष्ट्वा कः किं करोति इति लिखत।



(i)



(ii)




(iii)



(iv)



(v)



(vi)

वाक्यानि लिखत।

(i)

(ii)

(iii)

(iv)

(v)

(vi)

(vii)